# shrIviThThalAShTottarashatanAmAvaliH

# શ્રીવિટ્ઠલાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : viThThalAShTottarashatanAmAvaliH

File name : viThThalAShTottarashatanAmAvaliH.itx

Category : vishhnu, aShTottarashatanAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Source : padmapurANa

Latest update : March 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવિઠ્ઠલાષ્ટોત્તરશતનામાવલિઃ

ૐ ક્લીમ્ । વિઠ્ઠલાય નમઃ । પુણ્ડરીકાક્ષાય । પુણ્ડરીકનિભેક્ષણાય ।
પુણ્ડરીકાશ્રમપદાય । પુણ્ડરીકજલાપ્લુતાય । પુણ્ડરીકક્ષેત્રવાસાય ।
પુણ્ડરીકવરપ્રદાય । શારદાધિષ્ઠિતદ્વારાય । શારદેન્દુનિભાનનાય ।
નારદાધિષ્ઠિતદ્વારાય । નારદેશપ્રપૂજિતાય । ભુવનાધીશ્વરીદ્વારાય ।
ભુવનાધીશ્વરીશ્વરાય । દુર્ગાશ્રિતોત્તરદ્વારાય ।
દુર્ગમાગમસંવૃતાય । ક્ષુલ્લપેશીપિનદ્ધોરુગોપેષ્ટ્યાશ્લિષ્ટજાનુકાય ।
કટિસ્થિતકરદ્વન્દ્વાય । વરદાભયમુદ્રિતાય । ત્રેતાતોરણપાલસ્થ-
ત્રિવિક્રમાય । તિતઊક્ષેત્રપાય નમઃ ॥ ૨૦

અશ્વત્થકોટીશ્વરવરપ્રદાય નમઃ । કરવીરસ્થાય નારીનારાયણાય ।
નીરાસઙ્ગમસંસ્થાય । સૈકતપ્રતિમાર્ચિતાય । વેણુનાદેન દેવાનાં
મનઃ શ્રવણમઙ્ગલાય । દેવકન્યાકોટિકોટિનીરાજિતપદામ્બુજાય ।
પદ્મતીર્થસ્થિતાશ્વત્થાય । નરાય । નારાયણાય
મહતે । ચન્દ્રભાગાસરોનીરકેલિલોલદિગમ્બરાય ।
સસધ્રીચીત્સવિષૂચીરિતિશ્રુત્યર્થરૂપધૃષે ।
જ્યોતિર્મયક્ષેત્રવાસિને । સર્વોત્કૃષ્ટત્રયાત્મકાય ।
સ્વકુણ્ડલપ્રતિષ્ઠાત્રે । પઞ્ચાયુધજલપ્રિયાય ।
ક્ષેત્રપાલાગ્રપૂજાર્થિને । પાર્વતીપૂજિતાય । ચતુર્મુખસ્તુતાય ।
જગન્મોહનરૂપધૃષે વિષ્ણવે નમઃ ॥ ૪૦

મન્ત્રાક્ષરાવલી હૃત્સ્થકૌસ્તુભોરઃસ્થલપ્રિયાય નમઃ ।
સ્વમન્ત્રોજ્જીવિતજનાય । સર્વકીર્તનવલ્લભાય । વાસુદેવાય ।
દયાસિન્ધવે । ગોગોપીપરિવારિતાય । યુધિષ્ઠિરહતારાતયે ।
મુક્તકેશિને । વરપ્રદાય । બલદેવોપદેષ્ટ્રે । રુક્મિણીપુત્રનાયકાય ।
ગુરુપુત્રપ્રદાય । નિત્યમહિમ્ને । ભક્તવત્સલાય । ભક્તારિઘ્ને ।
મહાદેવાય । ભક્તાભિલષિતપ્રદાય । સવ્યસાચિને । બ્રહ્મવિદ્યાગુરવે ।
મોહાપહારકાય નમઃ ॥ ૬૦

ભીમામાર્ગપ્રદાત્રે નમઃ । ભીમસેનમતાનુગાય । ગન્ધર્વાનુગ્રહકરાય ।
અપરાધસહાય હરયે । સ્વપ્નદર્શિને । સ્વપ્નદૃશ્યાય ।
ભક્તદુઃસ્વપ્નશાન્તિકૃતે । આપત્કાલાનુપેક્ષિણે । અનપેક્ષાય ।
જનૈરપેક્ષિતાય । સત્યોપયાચનાય । સત્યસન્ધાય । સત્યાભિતારકાય ।
સત્યાજાનયે । રમાજાનયે । રાધાજાનયે । રથાઙ્ગભાજે । સિઞ્ચનાય ।
ગોપૈઃ ક્રીડનાય । દધિદુગ્ધાપહારકાય નમઃ ॥ ૮૦

બોધન્યુત્સવયુક્તીર્થાય નમઃ । શયન્યુત્સવ-
ભૂમિભાગે । માર્ગશીર્ષોત્સવાક્રાન્તવેણુનાદપદાઙ્કભુવે ।
દધ્યન્નવ્યઞ્જનાભોક્ત્રે । દધિભુજે । કામપૂરકાય । બિલાન્તર્ધાનસત્કેલિ-
લોલુપાય । ગોપવલ્લભાય । સખિનેત્રે પિધાયાશુ કોઽહં
પૃચ્છાવિશારદાય । સમાસમપ્રશ્નપૂર્વમુષ્ટિમુષ્ટિપ્રદર્શકાય ।
કુટિલીલાસુ કુશલાય । કુટિલાલકમણ્ડિતાય । સારીલીલાનુસારિણે ।
સદા વાહક્રીડાપરાય । કાર્ણાટકીરતિરતાય । મઙ્ગલોપવનસ્થિતાય ।
માધ્યાહ્નતીર્થપૂરેક્ષાવિસ્માયિતજગત્ત્રયાય । નિવારિતક્ષેત્રવિઘ્નાય ।
દુષ્ટદુર્બુદ્ધિભઞ્જનાય ।
વાલુકાવૃક્ષપાષાણપશુપક્ષિપ્રતિષ્ઠિતાય નમઃ ।
આશુતોષાય નમઃ । ભક્તવશાય । પાણ્ડુરઙ્ગાય । સુપાવનાય । પુણ્યકીર્તયે ।
પરસ્મૈ બ્રહ્મણે । બ્રહ્મણ્યાય । કૃષ્ણાય નમઃ ॥ ૧૦૮

ઇતિ શ્રીપદ્મપુરાણાન્તર્ગતા શ્રીવિઠ્ઠલાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIviThThalAShTottarashatanAmAvaliH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*